# Paramahamsa-Parivrajaka Upanishad

# પરમહંસપરિવ્રાજકોપનિષત્

## Document Information

Text title : paramahamsa-parivrAjakopanishad

File name : paramahansaparivrAjaka.itx

Category : upanishhat

Location : doc_upanishhat

Author : -

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 66, Sanyasa upaishad fro Atharva Veda

Latest update : Jan. 20, 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# પરમહંસપરિવ્રાજકોપનિષત્

પારિવ્રાજ્યધર્મવન્તો યજ્જ્ઞાનાદ્બ્રહ્મતાં યયુઃ ।
તદ્બ્રહ્મ પ્રણવૈકાર્થં તુર્યતુર્યં હરિં ભજે ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવા ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ।
સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યોઽરિષ્ટનેમિઃ ।
સ્વસ્તો નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ અથ પિતામહઃ સ્વપિતરમાદિનારાયણમુપસમેત્ય
પ્રણમ્ય પપ્રચ્છ ભગવંસ્ત્વન્મુખાદ્વર્ણાશ્રમધર્મ-
ક્રમં સર્વં શ્રુતં વિદિતમવગતમ્ ।
ઇદાનીં પરમહંસપરિવ્રાજકલક્ષણં વેદિતુમિચ્છામિ કઃ
પરિવ્રજનાધિકારી કીદૃશં પરિવ્રાજકલક્ષણં કઃ
પરમહંસઃ પરિવ્રાજકત્વં કથં તત્સર્વં મે બ્રૂહીતિ ।
સ હોવાચ ભગવાનાદિનારાયણઃ ।
સદ્ગુરુસમીપે સકલવિદ્યાપરિશ્રમજ્ઞો ભૂત્વા વિદ્વાન્સર્વ-
મૈહિકામુષ્મિકસુખશ્રમં જ્ઞાત્વૈષણાત્રયવાસનાત્રય-
મમત્વાહઙ્કારાદિકં વમનાન્નમિવ હેયમધિગમ્ય મોક્ષ-
માર્ગૈકસાધનો બ્રહ્મચર્યં સમાપ્ય ગૃહી ભવેત્ ।
ગૃહાદ્વની ભૂત્વા પ્રવ્રજેત્ ।
યદિ વેતરથા બ્રહ્મચર્યાદેવ પ્રવ્રજેદ્ગૃહાદ્વા વનાદ્વા ।

અથ પુનરવ્રતી વા વ્રતી વા સ્નાતકો વાઽસ્નાતકો વોત્સન્નાગ્નિ-
રનગ્નિકો વા યદહરેવ વિરજેત્તદહરેવ પ્રવ્રજેદિતિ બુદ્ધ્વા
સર્વસંસારેષુ વિરક્તો બ્રહ્મચારી ગૃહી વાનપ્રસ્થો વા
પિતરં માતરં કલત્રપુત્રમાપ્તબન્ધુવર્ગં તદભાવે શિષ્યં
સહવાસિનં વાનુમોદયિત્વા તદ્ધૈકે પ્રાજાપત્યામેવેષ્ટિં કુર્વન્તિ
તદુ તથા ન કુર્યાત્ । આગ્નેય્યામેવ કુર્યાત્ ।
અગ્નિર્હિ પ્રાણઃ પ્રાણમેવૈતયા કરોતિ ત્રૈધાતવીયામેવ કુર્યાત્ ।
એતયૈવ ત્રયો ધાતવો યદુત સત્ત્વં રજસ્તમ ઇતિ ।
અયં તે યોનિરૃત્વિયો યતો જાતો આરોચથાઃ ।
તં જાનન્નગ્ન આરોહાથાનો વર્ધયા રયિમિત્યનેન મન્ત્રેણાગ્નિ-
માજિઘ્રેત્ ।
એષ વા અગ્નેર્યોનિર્યઃ પ્રાણં ગચ્છ સ્વાં યોનિં ગચ્છસ્વા-
હેત્યેવમેવૈતદાહ ।
ગ્રામાચ્છ્રોત્રિયાગારાદગ્નિમાહૃત્ય સ્વવિધ્યુક્તક્રમેણ
પૂર્વવદગ્નિમાજિઘ્રેત્ ।
યદ્યાતુરો વાગ્નિં ન વિન્દેદપ્સુ જુહુયાત્ ।
આપો વૈ સર્વા દેવતાઃ સર્વાભ્યો દેવતાભ્યો જુહોમિ સ્વાહેતિ
હુત્વોદ્ધૃત્ય પ્રાશ્નીયાત્ સાજ્યં હવિરનામયમ્ ।
એષ વિધિર્વીરાધ્વાને વાઽનાશકે વા સમ્પ્રવેશે વાગ્નિપ્રવેશે
વા મહાપ્રસ્થાને વા ।
યદ્યાતુરઃ સ્યાન્મનસા વાચા વા સંન્યસેદેષ પન્થાઃ ।
સ્વસ્થક્રમેણૈવ ચેદાત્મશ્રાદ્ધં વિરજાહોમં કૃત્વાગ્નિ-
માત્મન્યારોપ્ય લૌકિકવૈદિકસામર્થ્યં સ્વચતુર્દશકરણ-
પ્રવૃત્તિં ચ પુત્રે સમારોપ્ય તદભાવે શિષ્યે વા તદભાવે
સ્વાત્મન્યેવ વા બ્રહ્મા ત્વં યજ્ઞસ્ત્વમિત્યભિમન્ત્ર્ય બ્રહ્મ-
ભાવનયા ધ્યાત્વા સાવિત્રીપ્રવેશપૂર્વકમપ્સુ સર્વવિદ્યાર્થ-
સ્વરૂપાં બ્રાહ્મણ્યાધારાં વેદમાતરં ક્રમાદ્વ્યાહૃતિષુ
ત્રિષુ પ્રવિલાપ્ય વ્યાહૃતિત્રયમકારોકારમકારેષુ પ્રવિલાપ્ય
તત્સાવધાનેનાપઃ પ્રાશ્ય પ્રણવેન શિખામુત્કૃષ્ય
યજ્ઞોપવીતં છિત્ત્વા વસ્ત્રમપિ ભૂમૌ વાપ્સુ વા વિસૃજ્ય
ૐ ભૂઃ સ્વાહા ૐ ભુવઃ સ્વાહા ૐ સુવઃ સ્વાહેત્યનેન
જાતરૂપધરો ભૂત્વા સ્વં રૂપં ધ્યાયન્પુનઃ પૃથક્

પ્રણવવ્યાહૃતિપૂર્વકં મનસા વચસાપિ સંન્યસ્તં મયા
સંન્યસ્તં મયા સંન્યસ્તં મયેતિ મન્દ્રમધ્યમતારધ્વનિ-
ભિસ્ત્રિવારં ત્રિગુણીકૃતપ્રેષોચ્ચારણં કૃત્વા પ્રણવૈક-
ધ્યાનપરાયણઃ સન્નભયં સર્વભૂતેભ્યો મત્તઃ સ્વાહેત્યૂર્ધ્વ-
બાહુર્ભૂત્વા બ્રહ્માહમસ્મીતિ તત્ત્વમસ્યાદિવાક્યાર્થસ્વરૂપા-
નુસન્ધાનં કુર્વન્નુદીચિં દિશં ગચ્છેત્ ।
જાતરૂપધરશ્ચરેત્ । એષ સંન્યાસઃ ।
તદધિકારી ન ભવેદ્યદિ ગૃહસ્થપ્રાર્થનાપૂર્વકમભયં
સર્વભૂતેભ્યો મત્તઃ સર્વં પ્રવર્તતે સખા મા ગોપાયૌજઃ
સખા યોઽસીન્દ્રસ્ય વ્રજોઽસિ વાર્ગઘ્નઃ શર્મ મે ભવ યત્પાપં
તન્નિવારયેત્યનેન મન્ત્રેણ પ્રણવપૂર્વકં સલક્ષણં વાઇણવં
દણ્ડં કટિસૂત્રં કૌપીનં કમણ્ડલું વિવર્ણવસ્ત્રમેકં
પરિગૃહ્ય સદ્ગુરુમુપગમ્ય નત્વા ગુરુમુખાત્તત્ત્વમસીતિ
મહાવાક્યં પ્રણવપૂર્વકમુપલભ્યાથ જીર્ણવલ્કલાજિનં
ધૃત્વાથ જલાવતરણમૂર્ધ્વગમનમેકભિક્ષાં પરિત્યજ્ય
ત્રિકાલસ્નાનમાચરન્વેદાન્તશ્રવણપૂર્વકં પ્રણવાનુષ્ઠાનં
કુર્વન્બ્રહ્મમાર્ગે સમ્યક્ સમ્પન્નઃ સ્વાભિમતમાત્મનિ ગોપયિત્વા
નિર્મમોઽધ્યાત્મનિષ્ઠઃ કામક્રોધલોભમોહમદમાત્સર્ય-
દમ્ભદર્પાહઙ્કારાસૂયાગર્વેચ્છાદ્વેષહર્ષામર્ષ-
મમત્વાદીંશ્ચ હિત્વા જ્ઞાનવૈરાગ્યયુક્તો વિત્તસ્ત્રીપરાઙ્મુખઃ
શુદ્ધમાનસઃ સર્વોપનિષદર્થમાલોચ્ય બ્રહ્મચર્યા-
પરિગ્રહાહિંસાસત્યં યત્નેન રક્ષઞ્જિતેન્દ્રિયો બહિરન્તઃસ્નેહવર્જિતઃ
શરીરસંધારણાર્થં વા ત્રિષુ વર્ણેષ્વભિશસ્તપતિતવર્જિતેષુ
પશુરદ્રોહી ભૈક્ષ્યમાણો બ્રહ્મભૂયાય ભવતિ ।
સર્વેષુ કાલેષુ લાભાલાભૌ સમૌ કૃત્વા પરપાત્રમધૂકરે-
ણાન્નમશ્નન્મેદોવૃદ્ધિમકુર્વન્કૃશીભૂત્વા બ્રહ્માહમસ્મીતિ
ભાવયન્ગુર્વર્થં ગ્રામમુપેત્ય ધ્રુવશીલોઽષ્ટૌ માસ્યેકાકી
ચરેદ્દ્વાવેવાચરેત્ ।
યદાલંબુદ્ધિર્ભવેત્તદા કુટીચકો વા બહૂદકો વા હંસો વા
પરમહંસો વા તત્તન્મન્ત્રપૂર્વકં કટિસૂત્રં કૌપીનં દણ્ડં
કમણ્ડલું સર્વમપ્સુ વિસૃજ્યાથ જાતરૂપધરશ્ચરેત્ ।
ગ્રામ એકરાત્રં તીર્થે ત્રિરાત્રં પત્તને પઞ્ચરાત્રં ક્ષેત્રે

સપ્તરાત્રમનિકેતઃ સ્થિરમતિરનગ્નિસેવી નિર્વિકારો નિયમાનિયામ-
મુત્સૃજ્ય પ્રાણસન્ધારણાર્થમયમેવ લાભાલાભૌ સમૌ
કૃત્વા ગોવૃત્ત્યા ભૈક્ષમાચરન્નુદકસ્થલકમણ્ડલુર્-
રબાધકરહસ્યસ્થલવાસો ન પુનર્લાભાલાભરતઃ શુભાશુભ-
કર્મનિર્મૂલનપરઃ સર્વત્ર ભૂતલશયનઃ ક્ષૌરકર્મપરિત્યક્તો
યુક્તચાતુર્માસ્યવ્રતનિયમઃ શુક્લધ્યાનપરાયણોઽર્થસ્ત્રીપુર-
પરાઙ્મુખોઽનુન્મત્તોઽપ્યુન્મત્તવદાચરન્નવ્યક્તલિઙ્ગોઽલિઙ્ગોઽવ્ય-
ક્તાચારો દિવાનક્તસમત્વેનાસ્વપ્નઃ સ્વરૂપાનુસન્ધાનબ્રહ્મ-
પ્રણવધ્યાનમાર્ગેણાવહિતઃ સંન્યાસેન દેહત્યાગં કરોતિ સ
પરમહંસપરિવ્રાજકો ભવતિ ।
ભગવન્ બ્રહ્મપ્રણવઃ કીદૃશ ઇતિ બ્રહ્મા પૃચ્છતિ ।
સ હોવાચ નારાયણઃ ।
બ્રહ્મપ્રણવઃ ષોડશમાત્રાત્મકઃ સોઽવસ્થાચતુષ્ટય-
ચતુષ્ટયગોચરઃ ।
જાગ્રદવસ્થાયાં જાગ્રદાદિચતસ્રોઽવસ્થાઃ સ્વપ્ને સ્વપ્નાદિ-
ચતસ્રોવસ્થાઃ સુષુપ્તૌ સુષુપ્ત્યાદિચતસ્રોઽવસ્થાતુરીયે
તુરીયાદિચતસ્રોઽવસ્થા ભવન્તીતિ ।
જાગ્રદવસ્થાયાં વિશ્વસ્ય ચાતુર્વિધ્યં વિશ્વવિશ્વો વિશ્વતૈજસો
વિશ્વપ્રાજ્ઞો વિશ્વતુરીય ઇતિ ।
સ્વપ્નાવસ્થાયાં તૈજસસ્ય ચાતુર્વિધ્યં
તૈજસવિશ્વસ્તૈજસતૈજસસ્તૈજસપ્રાજ્ઞસ્તૈજસતુરીય ઇતિ ।
સુષુપ્ત્યવસ્થાયાં પ્રાજ્ઞસ્ય ચાતુર્વિધ્યં પ્રાજ્ઞવિશ્વઃ
પ્રાજ્ઞતૈજસઃ પ્રાજ્ઞપ્રાજ્ઞઃ પ્રાજ્ઞતુરીય ઇતિ।
તુરીયાવસ્થાયાં તુરીયસ્ય ચાતુર્વિધ્યં
તુરીયવિશ્વસ્તુરીયતૈજસસ્તુરીયપ્રાજ્ઞસ્તુતુરીયતુરીય ઇતિ ।
તે ક્રમેણ ષોડશમાત્રા રૂઢાઃ અકારે જાગ્રદ્વિશ્વ ઉકારે
જાગ્રત્તૈજસો મકારે જાગ્રત્પ્રાજ્ઞ અર્ધમાત્રાયાં જાગ્રત્તુરીયો
બિન્દૌ સ્વપ્નવિશ્વોનાદે સ્વપ્નતૈજસઃ કલાયાં સ્વપ્નપ્રાજ્ઞઃ
કલાતીતે સ્વપ્નતુરીયઃ શાન્તૌ સુષુપ્તવિશ્વઃ શાન્ત્યાતીતે
સુષુપ્તતૈજસ ઉન્મન્યાં સુષુપ્તપ્રાજ્ઞો મનોન્મન્યાં
સુષુપ્તતુરીયઃ પુર્યાં તુરીયવિશ્વો મધ્યમાયાં તુરીયતૈજસઃ
પશ્યન્તાં તુરીયપ્રાજ્ઞઃ પરાયાં તુરીયતુરીયઃ ।

જાગ્રન્માત્રાચતુષ્ટયમકારાંશં સ્વપ્નમાત્રાચતુષ્ટય-
મુકારાંશં સુષુપ્તિમાત્રાચતુષ્ટયં મકારાંશં
તુરીયમાત્રાચતુષ્ટયમર્ધમાત્રાંશમ્ ।
અયમેવ બ્રહ્મપ્રણવઃ । સ પરમહંસતુરીયાતીતાવધૂતૈરુપાસ્યઃ ।
તેનૈવ બ્રહ્મ પ્રકાશતે તેન વિદેહમુક્તિઃ ।
ભગવન્ કથમયજ્ઞોપવીત્ત્યશિખી સર્વકર્મપરિત્યક્તઃ કથં
બ્રહ્મનિષ્ઠાપરઃ કથં બ્રાહ્મણ ઇતિ બ્રહ્મા પૃચ્છતિ ।
સ હોવાચ વિષ્ણુર્ભોભોઽર્ભક યસ્યાસ્ત્યદ્વૈતમાત્મજ્ઞાનં
તદેવ યજ્ઞોપવીતમ્ ।
તસ્ય ધ્યાનનિષ્ઠૈવ શિખા । તત્કર્મ સ પવિત્રમ્ ।
સ સર્વકર્મકૃત્ । સ બ્રાહ્મણઃ । સ બ્રહ્મનિષ્ઠાપરઃ ।
સ દેવઃ । સ ઋષિઃ । સ તપસ્વી । સ શ્રેષ્ઠઃ ।
સ એવ સર્વજ્યેષ્ઠઃ । સ એવ જગદ્ગુરુઃ । સ એવાહં વિદ્ધિ ।
લોકે પરમહંસપરિવ્રાજકો દુર્લભતરો યદ્યેકોઽસ્તિ ।
સ એવ નિત્યપૂતઃ । સ એવ વેદપુરુષો મહાપુરુષો યસ્તચ્ચિત્તં
મય્યેવાવતિષ્ઠતે । અહં ચ તસ્મિન્નેવાવસ્થિતઃ ।
સ એવ નિત્યતૃપ્તઃ । સ શીતોષ્ણસુખદુઃખમાનાવમાનવર્જિતઃ ।
સ નિન્દામર્ષસહિષ્ણુઃ । સ ષડૂર્મિવર્જિતઃ ।
ષડ્ભાવવિકારશૂન્યઃ । સ જ્યેષ્ઠાજ્યેષ્ઠવ્યવધાનરહિતઃ ।
સ સ્વવ્યતિરેકેણ નાન્યદ્રષ્ટા । આશામ્બરો નનમસ્કારો ન
સ્વાહાકારો ન સ્વધાકારશ્ચ નવિસર્જનપરો નિન્દાસ્તુતિ-
વ્યતિરિક્તો નમન્ત્રતન્ત્રોપાસકો દેવાન્તરધ્યાનશૂન્યો
લક્ષ્યાલક્ષ્યનિવર્તકઃ સર્વોપરતઃ સસચ્ચિદાનન્દાદ્વય-
ચિદ્ઘનઃ સમ્પૂર્ણાનન્દૈકબોધો બ્રહ્મૈવાહમમીત્યનવરતં
બ્રહ્મપ્રણવાનુસન્ધાનેન યઃ કૃતકૃત્યો ભવતિ સ હ
પરમહંસપરિવ્રાડિત્યુપનિષત્ ॥

હરિઃ ૐ તત્સત્ ।
ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવા ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ।

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ।
સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યોઽરિષ્ટનેમિઃ ।
સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ પરમહંસપરિવ્રાજકોપનિષત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*Paramahamsa-Parivrajaka Upanishad*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*